# Indian School Al Wadi Al Kabir

## Midterm Examination 2026-27

### Sub: Sanskrit (2nd Language)

Class: IX    Set – 1    Max. Marks: 80

Date: 22/9/2026    Time: 3 Hours

General Instructions:

1. All questions are compulsory.
2. The question paper consists of **19** questions.
3. There is no overall choice. However, internal choices have been provided.
4. This question paper consists of **9** printed pages.

---

**खण्ड -'क'- अपठित गद्यांश (10 अंक)**

**1.गद्यांशम् पठित्वा एतदाधारितान् प्रश्नान् उत्तरत | (Read the passage and answer the questions) 10**

विष्णुवर्धनस्य राजसभायां महाकविः भारविः राजकविः आसीत्। भारविः बाल्यकाले महता परिश्रमेण विद्याम् अर्जितवान्। तस्य विलक्षणा प्रतिभा काव्यरचनायामपि प्रवृत्ता। तस्य कीर्तिलता अल्पेनैव कालेन चतुर्दिक्षु प्रासरत्। भारवेः पिता पुत्रस्य काव्ययशसा मनसि अत्यन्तं प्रसन्नः सन्तुष्टश्चासीत्। तथापि सः वचसा भारविं कदापि न प्राशंसत्। प्रत्युत सः यदा-कदा तस्य पाण्डित्यस्य आलोचनाम् अकरोत् । एकदा भारवेः पिता एकस्यां सभायां तस्य तिरस्कारं कृतवान्। सः चिन्तया रात्रौ निद्रां न लब्धवान्। गृहे इतस्ततः पर्यटन् सः रात्रौ पितुः प्रकोष्ठात् बहिरेव किञ्चित्कालं स्थितः। तदा स्वविषये मातापित्रोः वार्तालापम् अशृणोत्-अस्माकं पुत्रः महाकविः महापण्डितश्च। भारवेः यशः निरन्तरं वर्धते। सः समाजे अस्माकमपि गौरवं स्थापयति, किन्तु सः इतोऽपि अधिकं कवित्वं कीर्ति- चार्जयेत् इति विचार्य सभायामद्य मया तिरस्कृता-इति।

**I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।) (केवलं प्रश्नद्वयम्) 2x1=2**

(i) कस्य राजसभायां भारविः राजकविः आसीत्? (ii) भारविः बाल्यकाले केन विद्यां अर्जितवान्?

(iii) महाकविः महापण्डितश्च कः ?

**II. पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।) 2x2=4**

(i) भारविः स्वविषये मातापित्रोः किं वार्तालापम् अशृणोत्?

(ii) भारवेः पिता कथं प्रसन्नः सन्तुष्टश्चासीत्? (iii) तस्य प्रतिभा कुत्र अपि प्रवृत्ता?

**III. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। (इस अनुच्छेद का उचित शीर्षक लिखिए।) 1**

**IV. यथानिर्देशम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।) (केवलं प्रश्नत्रयम्) 3x1=3**

(i) 'महता परिश्रमेण' अनयोः विशेष्यपदं किम् अस्ति?

(क) महता (ख) परिश्रमेण (ग) भारविः (घ) राजकविः

**(ii) 'सः चिन्तया रात्रौ निद्रां न लब्धवान्' अस्मिन् वाक्ये किम् क्रियापदम्?**

(क) रात्रौ (ख) लब्धवान् (ग) निद्रां (घ) चिन्तया

**(iii) 'अर्जितवान्' इति क्रियापदस्य कर्तृपदं किम् अस्ति ?**

(क) विष्णुवर्धनः (ख) भारविः (ग) कोऽपिजनः (घ) पिता

**(iv) "भारवेः पिता पुत्रस्य काव्ययशसा मनसि अत्यन्तं प्रसन्नः आसीत्, तथापि सः वचसा भारविं कदापि न प्राशंसत्।" अस्मिन् वाक्ये 'सः' इति सर्वनामपदं कस्य बोधं कारयति?**

(क) भारवेः (ख) भारवेः पितुः (ग) विष्णुवर्धनस्य (घ) यशसः

## खण्ड - 'ख'- रचनात्मककार्यम् (15 अंक)

**2. भवान् सुकेशः। भवतः मित्रं महेशः शिमलानगरे वसति । ग्रीष्मावकाशे मित्रं प्रतिभ्रमणाय मञ्जूषातः शब्दं चित्वा पत्रं पूरयत।** **10x1/2=5**

छात्रावासः,

हमीरपुरतः।

दिनाङ्कः 22/9/2026

प्रिय (i) ---------------------- महेशः

(ii) ---------------------- ।

अत्र कुशलं (iii) ---------------------- । चिरकालतः (iv) ---------------------- समाचारं न प्राप्तम्।

अहं (v) -------------------------. भवतां समीपे शिमलाम् (vi) ----------------------------

इच्छामि। ग्रीष्मकाले शिमलानगरे तु (vii) ---------------------- भवति। तत्र (viii) ------------------------------- पर्वताः जनान्

आकर्षयन्ति तत्र (ix) ---------------------- प्राकृतिक दृश्यं द्रक्ष्यामि।

गृहे मातृ-पितृचरणयोः प्रणामाः।

भवदीयम् (x) ----------------------

**सुकेशः**

| |
|---|
| **मञ्जूषा -** ग्रीष्मावकाशे, मित्र, भवतः, शैत्यं, आगन्तुम्, तत्रास्तु, हिमाच्छादिताः, अहमपि, मित्रम्, नमोनमः। |

**3. अधोदत्तचित्रस्य वर्णनम् मञ्जूषायां प्रदत्तपदनाम् सहायतया पञ्चवाक्येषु कुरुत । 5x1= 5**




| |
|---|
| **मञ्जूषा-** आरण्यके, कुटीरः, एषः, आरण्यकस्य, एकस्य अधः तिष्ठति, गुरुः, उपदिशति, छात्राः, तिष्ठन्ति । |

**अथवा**

**मञ्जूषायाः सहायतया "रक्षाबन्धन-पर्वः" इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत ।**

| |
|---|
| **मञ्जूषा– रक्षाबन्धन-पर्वणि, बध्नाति, तस्यै, यच्छति, भवन्ति, भ्रात्रेः, पूर्णिमायाः, अवसरे, मन्यते, उत्सव भ्राताः भगिनी, रक्षाबन्धनम्, आशीर्वादम्, उपहारम्, प्रहर्षमनाः, देशे, सर्वे, श्रावणी, श्रावण मासस्य ।** |

**4. अधोलिखितं कथाम् मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत । 10x1/2=5**

**महिला क्रिकेटः**

भारतदेशे क्रीडाक्षेत्रे (i) ----------------- परिवर्तनम् अभवत्। एकदा (ii) -------------------- महिलाक्रिकेट-संघः नूतनायाः (iii) ------------------- कृते सुसज्जितः आसीत्। सर्वा क्रीडिकाः अतिशयेन (iv) --------अभ्यासं कुर्वन्ति स्म। तासु एका युवती-हरमनप्रीत कौर- "स्वयम् उवाच, अद्य वयं केवलं क्रीडिकाः न, अपि तु (v) -------------------- गौरवस्य वहित्र्यः स्मः।" अनेन सम्भाषणेन सर्वाः प्रेरिताः अभवन्। प्रतियोगितादिवसे (vi) ---------------------- दृढनिश्चयेन क्षेत्रं प्रविष्टः। विपरीतस्तिथौ अपि ताः धैर्यं न जहन्ति स्म। अन्ते हरमनप्रीतस्य दीर्घेण (vii) --------------------- तथा स्मृतिमन्धानायाः अद्भुतक्रीडया भारतसंघः विजयम् अलभत। (viii) --------------------- संघस्य साहसम्, परिश्रमः, एकता च विश्वाय (ix) ------------------------- जातः। भारतस्य महिला क्रिकेटसंघ-केवलं क्रीडायाः क्षेत्रे न, अपि तु देशस्य (x) ---------------------- प्रतीकः इति प्रसिद्धम् अभवत्।

| |
|---|
| **मञ्जूषा -** प्रतियोगितायाः, उत्साहेन, भारतसंघ, महान्, भारतस्य, राष्ट्रस्य, प्रहारेण, नारीशक्तेः, भारतीयमहिलाक्रिकेट, आदर्शः |

**अथवा**

**मञ्जूषाप्रदत्तपदैः अधोलिखितं संवादं पूरयत।** **5x1= 5**

(मंजूषा में दिए गए पदों से निम्नलिखित संवाद को पूरा कीजिए।)

मेघा - अरे कृष्ण! त्वं किम करोषि ?

कृष्णः - अहं (i) ---------------------------------- ।

मेघा - इदं त्वया उचितं न कृतम्। अवकरं यत्र-तत्र न क्षिपेत् केवलं पात्रे हि क्षिपेत्।

कृष्णः - कथम् अत्र तव गृहम् अस्ति किम् ?

मेघा - नहि, मम गृहं नास्ति, परन्तु (ii) ---------------------------------- ।

कृष्णः - गच्छ, स्वकार्यं कुरु। अलं विवादेन ।

मेघा - प्रथमम् अवकरं (iii) ---------------------------------- ।

कृष्णः - इदम् अहं न करिष्यामि।

मेघा - मित्र ! अत्र वयं भ्रमामः क्रीडामः च। अवकरेण विविधाः रोगाः (iv) ---------------------------- ।मार्गाणां स्वच्छता तु सर्वेषां स्वास्थ्याय आवश्यकम् अस्ति। वयं छात्राः स्मः। वयम् एव स्वच्छतायाः सन्देशं दातुं शक्नुमः।

कृष्णः - सत्यं कथयसि। शीघ्रं स्वच्छं करोमि । इदं तु स्वच्छ (v) ---------------------------------- ।

| |
|---|
| **मञ्जूषा -** उत्पन्नाः भवन्ति । अवकरं क्षिपामि। पात्रे क्षिपतु ।<br>पर्यावरणाय अपि आवश्यकम् ।<br>स्वच्छता तु सर्वेषां कृते आवश्यकी भवति। |

## खण्ड -'ग' अनुप्रयुक्तव्याकरणम् (25 अंक)

**5. अधोलिखितानां-पदानां सन्धि सन्धिविच्छेदम् वा कुरुत – (केवलं प्रश्नत्रयम्)** **3**

(क) सर्वेऽपि (ख) वयः + तेजसः (ग) अचिरात् + एव (घ) कश्चित् ।

**6. अधोलिखितवाक्येषु विकल्पेभ्यः उचित विभक्तिरूपेण वाक्यपूर्तिं कृत्वा पुनः लिखत ।** **4**
**(केवलं प्रश्नचतुष्टयम्)**

(निम्नलिखित वाक्यों में विकल्पों के उचित विभक्ति रूप से वाक्यों की पूर्ति करके पुनः लिखिए।)
**(केवल 4 प्रश्न)**

**प्रश्न 1. सः --------- काणः अस्ति ।**

(क) नेत्रम् (ख) नेत्रेण (ग) नेत्राय (घ) नेत्रस्य

**प्रश्न 2. ----------- सह पुत्री क्रीडति ।**

(क) जनकम् (ख) जनकेन (ग) जनकात् (घ) जनकस्य

**प्रश्न 3. ------------ परितः छात्राः भवन्ति ।**

(क) शिक्षकम् (ख) शिक्षकात् (ग) शिक्षकेन (घ) शिक्षकस्य

**प्रश्न 4. अलम् ----------------- ।**

(क) विस्तरम् (ख) विस्तरेण (ग) विस्तराय (घ) विस्तरेषु

**प्रश्न 5. सुरेश: ------------------- बधिर: अस्ति ।**

(क) कर्णाभ्याम् (ख) कर्ण: (ग) कर्णम् (घ) कर्णात्

**7. अधोलिखितवाक्येषु कोष्ठके प्रदत्त शब्दस्य उचित रूपेण रिक्तस्थानपूर्ति कृत्वा पुन: लिखत ।**

**(केवलं प्रश्नत्रयम्) 3**

(निम्नलिखित वाक्यों में कोष्ठक में दिए गए शब्द के उचित रूप से रिक्त स्थान की पूर्ति करके पुनः लिखिए।) **(केवल 3 प्रश्न)**

**प्रश्न 1. ------- नाम रमा अस्ति? (किम्)**

(क)कया (ख) कस्या (ग) कस्मै (घ)कस्याम्

**प्रश्न 2. --------- उद्याने पुष्पाणि विकसन्ति । (तत्)**

(क)तेन (ख)तस्मिन् (ग) तस्मै (घ) तम्

**प्रश्न 3. ----------- विद्यालये पठन्ति । (बालक)**

(क) **बालकान्** (ख) **बालकम्** (ग) **बालका:** (घ) **बालकौ**

**प्रश्न 4. -------- गृहं गच्छामि । (अस्मद्)**

(क) मया (ख) अहम् (ग) मह्यम (घ) मम

**8. अधोलिखितवाक्येषु विकल्पेभ्य: उचित धातुरूपेण वाक्यपूर्ति कृत्वा पुन: लिखत । 3**

**(केवलं प्रश्नत्रयम्)**

(निम्नलिखित वाक्यों में विकल्पों के उचित **धातु** रूप से वाक्यों की पूर्ति करके पुनः लिखिए।)

**(केवल 3 प्रश्न)**

**प्रश्न 1.वयम् अद्य विद्यालयं न -------------------- । (लृट् लकार)**

(क) गमिष्यति (ख) गमिष्यन्ति (ग) गमिष्यामि (घ) गमिष्याम:

**प्रश्न 2. ह्य: त्वं कुत्र ---------------? (लङ् लकार)**

(क) आसी: (ख) आसीत् (ग)आसन् (घ)आस्ताम्

**प्रश्न 3. 'भू' धातु लोट् लकारे, प्रथमपुरुषस्य, बहुवचने रूपम् अस्ति ।**

(क)भवन्तु (ख) भवामि (ग) भवतु (घ) भवथ

**प्रश्न 4. 'वद्' धातु लट् लकारे, मध्यमपुरुषस्य, द्विवचने रूपम् अस्ति ।**

(क) वदथ: (ख) वदसि (ग) वदथ (घ) वदाव:

**9. रेखांकितपदेषु प्रदत्त विकल्पेभ्य: समीचीनम् पदं चिनुत । (केवलं प्रश्नत्रयम्) 3**

**प्रश्न 1.** नामदेव: करुणया **धावितवान्** ।

(क) धाव् + क्तवतु (ख) धाव् + क्त (ग) धाव् + क्त्वा (घ) धाव् + तुमुन्

**प्रश्न 2.** स: **व्यथित:** भवति स्म ।

(क) व्यथ् + क्त (ख) व्यथ् + क्तवतु (ग) व्यथ् + क्त्वा (घ) व्यथ् + तुमुन्

**प्रश्न 3.** अतः आवाम् तं सम्यक् **<u>दण्डितवन्तौ</u>** l

(क) दण्ड् + क्त्वा (ख) दण्ड् + क्तवतु (ग) दण्ड् + ल्यप् (घ) दण्ड् + क्त

**प्रश्न 4.** ते नाटकं **<u>दृश् + क्त्वा</u>** प्रसन्ना जाताः l

(क) दृशित्वा (ख) दृष्ट्वा (ग) दर्शित्वा (घ) दृष्टित्वा

**10. अधोलिखितानां समस्तपदानां उदाहरणानुसारं विग्रहं कुरुत l (केवलं प्रश्नचतुष्टयम्) 4**

**यथा – भारतीयैकतासाधकम् भारतीयैकतायाः साधकम् ।**

**प्रश्न 1.** ज्ञानपुञ्जप्रभादर्शकम् **प्रश्न 2.** सर्ववाणीपरिष्कारकम्

**प्रश्न 3.** विश्वबन्धुत्वविस्तारकम् **प्रश्न 4.** शान्तिसंस्थापकम्

**प्रश्न 5.** सर्वभूतैकताकारकम्

**11. अधोलिखितवाक्येषु अंकानां स्थाने संख्यावाचकपदैः रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत ।**

**(केवलं प्रश्नत्रयम्) 3**

(क) पांडवाः ----------- (5) आसन् l (ख) वेदाः -------- (4) सन्ति l

(ग) वृक्षात् ------- (9) फलानि पतन्ति l (घ) ------ (2) महिले फलानि आनयतः l

**12. अधोलिखितवाक्येषु उचित अव्ययपदैः रिक्तस्थानानि पूरयत । (केवलं प्रश्नचतुष्टयम्) 2**

(क) अहं ---- पठामि l (अधुना/एकत्र/नो) (ख) ----- गुरुवासरः भविष्यति l (अद्य/श्वः/ह्यः)

(ग) त्वं ---- गच्छसि? (कुत्र/न/च) (घ) ---- मा वद l (एव/वृथा/नो)

(ङ) यथा राजा ------ प्रजा भवति l (तथा/कदा/सदा)

## खण्ड - 'घ'- पठितावबोधनम् (30)

**13. अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानां उत्तराणि संस्कृतेन लिखित l 5**

अनेकदा छात्राः मातापितृभ्यां कष्टार्जितधनस्य तुच्छकारणैः अपव्ययं कुर्वन्ति। जिह्वालालसापूर्त्यर्थं त्वरिताहारः, शीतपेयं, पुटीकृतभोजनं, तथैव व्यसनपदार्थानां सेवनं, प्रदर्शनकारिपरिधानं विलासितापूर्णम् आचरणं चेत्यादि यत्र प्रभूतः अपव्ययः भवति। एतैः न केवलं धनहानिः, स्वास्थ्यहानिरपि जायते। स्वास्थ्यहानिकारणात् पुनः धनव्ययो वर्धते।

**1. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।) (केवलं प्रश्नद्वयम्) 1/2+1/2=1**

(i) अनेकदा छात्राः धनं कथं अपव्ययं कुर्वन्ति?

(ii) विलासितापूर्णेन आचरणेन कस्य हानिः भवति?

(iii) धनस्य स्वास्थ्यस्य च हानिः केन भवति?

**II. पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।) (केवलं प्रश्नद्वयम्) 1+1=2**

(i) कठोरं परिश्रमं कृत्वा कः धनं अर्जयति?

(ii) स्वास्थ्यहानिकारणात् पुनः कः वर्धते?

(iii) जिह्वालालसापूर्त्यर्थं छात्राः किं खादन्ति?

**III. निर्देशानुसारं उत्तरत। (निर्देशानुसार उत्तर दीजिए।) 1+1=2**

(i) 'यत्र प्रभूतः अपव्ययः भवति।' अस्मिन् वाक्ये क्रियापदं किमस्ति?

(ii) 'विलासितापूर्णम् आचरणम् अनयोः पदयोः विशेष्यपदं किमस्ति?

**अथवा**

(i) 'अपव्ययः' शब्दस्य विलोमपदं चित्वा लिखत?

(ii) 'अत्यधिकः' विशेषणपदस्य पर्यायपदं लिखत?

**14. अधोलिखितं पद्यांशं पठित्वा प्रदत्त प्रश्नानां उत्तराणि संस्कृतेन लिखित I** **5**

विश्वबन्धुत्वविस्तारकं संस्कृतम्, सर्वभूतैकताकारकं संस्कृतम्।

सर्वतः शान्तिसंस्थापकं संस्कृतम्, पञ्चशीलप्रतिष्ठापकं संस्कृतम् ।।

**1. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।) (केवलं प्रश्नद्वयम्) 1/2+1/2 =1**

(i) विश्वबन्धुत्वस्य विस्तारकं का भाषा करोति?

(ii) संस्कृतभाषा सर्वेषु प्राणिषु कस्याः कारकमस्ति?

(iii) संस्कृतभाषा कुत्र शान्ति स्थापयति?

**II. पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।) 1+1=2**

(i) संस्कृतभाषा केषाम् सिद्धान्तान् प्रतिष्ठितं करोति?

(ii) पञ्चशीलसिद्धान्तेः किं-किम् अस्ति?

(iii) विश्वबन्धुत्वेन कः अभिप्रायः?

**III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।) 1+1=2**

(i) 'संसारम्' पदस्य पर्यायपदं पद्यांशे किमस्ति?

(ii) 'पञ्चशीलप्रतिष्ठापकं संस्कृतम्' अस्मिन् वाक्ये विशेष्यपदं किमस्ति?

**अथवा**

(i) 'अशान्तिः' पदस्य विलोमपदं किमस्ति ?

(ii) पद्यांशात् एकम् अव्ययपदं चित्वा लिखत ।

**15. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** **5**

(निम्नलिखित नाट्यांशों को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए।)

**नाट्यांशः -**

कस्मिंश्चिद्देशे धर्मबुद्धिः पापबुद्धिश्च द्वे मित्रे प्रतिवसतः स्म। अथ कदाचित्पापबुद्धिना चिन्तितं यदहं तावान्मूर्खो दरिद्रतया पीडितश्च। अत एनं धर्मबुद्धिं स्वीकृत्य अन्यं देशं गच्छामि, तत्र अस्य आश्रयणेन धनं सम्पादयामि, अनन्तरम् एनमपि वञ्चयित्वा सुखी भवामि इति। अथान्यस्मिन् अहनि धर्मबुद्धिमुपेत्याह—

**पापबुद्धिः** - भो मित्र ! यदा भवान् वृद्धः भवति तदा 'बाल्ये यौवने वा मया एवं कृतम्' इति वक्तुं योग्यं किं कार्यं स्मरति? भवता अन्यः देशः न दृष्टः एव चेत् भवतः शिशून् अन्यदेशसम्बन्धे कां कथां वदिष्यति ?

**I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।) 1/2+1/2 =1**

(i) धर्मबुद्धिः पापबुद्धिः कुत्र वसतः स्म?

(ii) मूर्खः दरिद्रः च कः आसीत्?

(iii) पापबुद्धिः कं नीत्वा विदेशं गच्छति?

**II. पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।) 1+1=2**

(i) 'यदा भवान् वृद्धः भवति'- केन उक्तम्?

(ii) पापबुद्धिना किं चिन्तितम्?

(iii) अस्य आश्रयणेन किं सम्पादयति ?

**III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।) 1+1=2**

(i) 'बाल्ये यौवने वा मया एवं कृतम्' अत्र क्रियापदं किमस्ति ?

(ii) 'कस्मिंश्चिद्देशे' पदे विशेष्यपदं किम् अस्ति?

**अथवा**

(i) 'भवति' क्रियापदस्य कर्तृपदं लिखत।

(ii) 'यदहं तावान्मूर्खो दरिद्रतया पीडितश्च' अत्र 'अहं' सर्वनामपदं कस्मै प्रयुक्तम्?

**16. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत - (केवलं पञ्चप्रश्नाः) 1x5=5**

(क) **<u>सुखस्य</u>** मूलं धर्मः। (ख) सन्मार्गेण एव **<u>धनार्जनं</u>** करणीयम् ।

(ग) सर्वं धनं स्वीकृत्य **<u>स्वग्रामं</u>** गच्छावः । (घ) **<u>एनम्</u>** अपि वञ्चयित्वा सुखी भवामि ।

(ङ) दिनस्य आरम्भे **<u>धर्मार्थयोः</u>** चिन्तनम् आवश्यकम् ।

**(च) <u>अनैतिकः</u>** आर्थिकव्यवहारः कदापि न करणीयः ।

**17. वाक्येन सह ग्रन्थस्य सम्मेलनं कुरुत – 2**

| | |
|---|---|
| (क) जलबिन्दुनिपातेन क्रमशः पूर्यते घटः । | १. गरुडपुराणम् |
| (ख) ब्राह्मे मुहूर्ते चोत्थाय धर्ममर्थं च चिन्तयेत्। | २. मनुस्मृतिः |
| (ग) सर्वेषामेव शौचानामर्थशौचं परं स्मृतम् । | ३. अर्थशास्त्रम् |
| (घ) सुखस्य मूलं धर्मः, धर्मस्य मूलम् अर्थः । | ४. चाणक्यनीति |

**18. अधोलिखितानि वाक्यानि कः कं प्रति कथयति इति लिखत — (केवलं प्रश्नचतुष्टयम्) 4**

(क) वत्स! द्रुतं वद येन तद् द्रव्यं स्थिरं तिष्ठेत् ।

(ख) प्रातःकाले युवामस्माभिः सह तत्र वनप्रदेशं गच्छतम् ।

(ग) त्वया हृतम् एतद्धनं, नान्ये न ।

(घ) भोः दुरात्मन्! मा मैवं वद ।

(ङ) एतत् सर्व मपि पापबुद्धेः चेष्टितम् ।

**19. अधोलिखितानां प्रश्नानां शुद्धं विकल्पं चिनुत - (केवलं प्रश्नचतुष्टयम्) 4**

**(क) "सुखस्य मूलं धर्मः, धर्मस्य मूलम् अर्थः" इत्यस्य मुख्य आशयः कः अस्ति?**

(१) सुखस्य आधारः केवलम् अर्थः एव। (२) धर्मस्य आधारः केवलं सुखम् एव ।

(३) धर्मस्य आधारः अर्थः, सुखस्य आधारः धर्मः । (४) सुखं, धर्मः, अर्थः- एतेषां मध्ये सम्बन्धः नास्ति।

**(ख) गरुडपुराणे किम् उपदिष्टम् अस्ति ?**

(१) रात्रौ धनस्य चिन्तनं करणीयम् । (२) प्रभाते धर्मार्थयोः चिन्तनं करणीयम् ।

(३) केवलं धर्मचिन्तनं करणीयम् । (४) केवलम् अर्थचिन्तनं करणीयम्।

**(ग) "सर्वेषामेव शौचानामर्थशौचं परं स्मृतम्" इत्यस्य तात्पर्य किम्?**

(१) जलशौचमेव श्रेष्ठम् । (२) मृद्वारिशौचमेव श्रेष्ठम् ।

(३) अर्थशौचं सर्वोपरि, अन्यविधशौचेभ्यः श्रेयः । (४) शौचस्य आवश्यकता नास्ति ।

**(घ) छात्रैः क्रियमाणः अपव्ययः कः?**

(१) स्वास्थ्यलाभाय व्ययः । (२) विद्यार्जनाय व्ययः ।

(३) आडम्बरयुक्तः प्रदर्शनात्मकः व्ययः। (४) आत्मसुरक्षायै व्ययः ।

**(ङ) "जलबिन्दुनिपातेन क्रमशः पूर्यते घटः" इति वाक्यं कः अवदत्?**

(१) बृहस्पतिः (२) चाणक्यः

(३) मनुः (४) याज्ञवल्क्यः

***All the Best***